# Gautamakritam 2 Shiva Stotram

# गौतमकृतं २ शिवस्तोत्रम्

## Document Information

Text title : Gautamakritam 2 Shiva Stotram

File name : gautamakRRitaM2shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | mAheshvarakhaNDa | aruNAkhaNDa | pUrvakhaNDa | adhyAya 8/9-23||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2025

*sanskritdocuments.org*

# गौतमकृतं २ शिवस्तोत्रम्

अस्तौषमादिमं लिङ्गमरुणाद्रिमयं महत् ॥ ९॥

आद्येन ब्रह्मणा पूर्वमर्च्चितं दिव्यचक्षुषा ।
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ॥ १०॥

इति वेदा स्तुवन्ति त्वामरुणाद्रीश सन्ततम् ।
नमस्ताम्राय चारुणाय शिवाय परमात्मने ॥ ११॥

सर्ववेदस्वरूपाय नित्यायामृतमूर्त्तये ।
कालाय करुणार्द्राय दृष्टिपेयामृताब्धये ॥ १२॥

भक्तवात्सल्यपूर्णाय पुण्याय पुरभेदिने ।
दर्शनं तव देवेश सर्वधर्मफलप्रदम् ॥ १३॥

भुवि लब्धवता भूयो नान्यत्कार्यं तपः क्वचित् ।
भवता कर्मभूरेषा वर्ततेऽद्य निरोधिता ॥ १४॥

प्रार्थयन्ते स्वयं वासान्देवाश्चात्र त्वदाश्रये ।
कालसङ्ग्रहसञ्जातं फलं लब्धं मयाधुना ॥ १५॥

अन्यत्कृतं तपः सर्वं त्वद्दर्शनफलं मम ।
ईदृशं तव देवेश रूपमत्यद्भुतोदयम् ॥ १६॥

एकमद्रिमयं लिङ्गं न क्वचिद्दृष्टवान्भुवि ।
सूर्येन्द्वग्निसुसंयुक्तकोणत्रयमनोहरम् ॥ १७॥

त्रिमूर्तिरूप देवेश दृश्यते ते वपुर्महत् ।
शक्तित्रयस्वरूपेण कालत्रयविधानकम् ॥ १८॥

त्रिवेदात्मं त्रिकोणाङ्गं लिङ्गं ते दृष्टमद्भुतम् ।
त्रैलोक्यरक्षणार्थाय विततं रूपमास्थितः ॥ १९॥

दृश्यते वसुधाभागे शोणाद्रिरिति विश्रुतः ।

अजानतां च मर्त्यानां समालोकनमात्रतः ॥ २० ॥

वितरत्यखिलान्भोगानव्याजकरुणानिधिः ।
अर्चया रहितं लिङ्गमन्यं शून्यमुदाहृतम् ॥ २१ ॥

इदं तु पूजितं देवैः सदा सर्ववरप्रदम् ।
प्रसीद करुणापूर्ण शोणाचलमहेश्वर ॥ २२ ॥

त्रायस्व भवभीतं मां प्रपन्नं भक्तवत्सल ।
द्रष्टव्यं द्रष्टमेतत्ते रूपमत्यद्भुतं महत् ॥ २३ ॥

कृतार्थय कृपासिन्धो शरण्य शरणागतम् ॥

इति श्रीस्कन्दपुराणे माहेश्वरखण्डे, अरुणाचलमाहात्म्ये, पूर्वार्धे,
अष्टमाध्यायान्तर्गतं गौतमकृतं शिवस्तोत्रं समाप्तम् ।

स्कन्दपुराण । माहेश्वरखण्ड । अरुणाखण्ड । पूर्वखण्ड । अध्याय ८/९-२३ ॥

skandapurANa . mAheshvarakhaNDa . aruNAkhaNDa . pUrvakhaNDa . adhyAya 8/9-23..

Proofread by PSA Easwaran

*Gautamakritam 2 Shiva Stotram*

pdf was typeset on April 27, 2025

Please send corrections to *sanskrit@cheerful.com*